International Journal of Sanskrit Research 2022; 8(4): 233-236

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(4): 233-236
© 2022 IJSR
www.anantaajournal.com
Received: 22-05-2022
Accepted: 28-06-2022

**Raja Vanamamalai**
Research Scholar, SCSVMV
Deemed to be Universiy,
Enathur Kanchipuram, Tamil
Nadu, India

**Corresponding Author:**
**Raja Vanamamalai**
Research Scholar, SCSVMV
Deemed to be Universiy,
Enathur Kanchipuram, Tamil
Nadu, India

# श्रव्यकाव्यभेदाः

**Raja Vanamamalai**

## प्रस्तावना

अर्थरमणीयताधारेण श्रव्यकाव्यम् उत्तममध्यमावरादिभेदेन भिद्यते। यस्मिन् काव्ये रमणीयते व्यङ्ग्यार्थे स्यान्न तु वाच्यार्थे, तदेवोत्तमं ध्वनिकाव्यं मतम्। यत्र तु व्यङ्ग्यार्थस्य वाच्यार्थस्य च समानचमत्कारः स्यात्, तत् मध्यमकाव्यमुक्तम्। वाच्यार्थे एव यस्य चमत्कारः प्रदृश्यते, तत् अवरकाव्यमुच्यते। मम्मटेन अवरकाव्यं व्यङ्ग्यरहितमुक्तम् -

‘शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्’ । (काव्यप्रकाशः १।५)

जयदेवेन तु व्यङ्ग्यरहितं काव्यम् अकाव्यमुक्तम्। काव्यस्य सर्वेष्वपि भेदेषु अर्थरमणीयताऽऽधारेण क्रियमाणाः उत्तममध्यमादिभेदाः उपलभ्यन्ते, यतो हि अर्थरमणीयता श्लोकस्य गद्यस्य वा कस्मिंश्चिदपि वाक्ये प्राप्तुं शक्या।

भाषायाः आधारेण काव्यवर्गीकरणमपि कतिपयाचार्यैः कृतम्। वस्तुतः वर्गीकरणमिदम् अत्यन्तं स्थूलं भवति। कवेः अभिव्यक्त्यर्थं माध्यमरूपेण या कापि भाषा योक्तुं शक्या। महाकाव्यं गद्यकाव्यं नाटकः इत्यादिकृतीः संस्कृते प्राकृते इतरासु आधुनिकभाषासु वा लिखितुं शक्याः। अतः वर्गीकरणमिदं महत्त्वपूर्णं नास्ति। भाषावदेव अवस्थादेशकालाद्याधारेणापि कृतं वर्गीकरणं स्थूलं भवति।

शैल्याधारेण श्रव्यकाव्यं त्रिधा भिद्यते - पद्यकाव्यं गद्यकाव्यं मिश्रकाव्यं चेति। छन्दोबद्धपदं पद्यमिति, छन्दोविहीनं च पदं गद्यमिति चोच्यते। गद्यपद्ययोः भेदं स्पष्टीकुर्वता आचार्येण भरतेन उक्तं यत् गद्यपदेषु अक्षराणां निश्चितं मानं नास्तीति। तानि पदानि अर्थसापेक्षाणि भवन्ति। तानि ‘चूर्ण’ इति शब्देन व्यवह्रियन्ते। पद्ये अक्षराणां पदानां च निश्चितं मानं भवति। अनेन, प्रत्येकमपि पदं यस्य कस्यापि वा छन्दसः अङ्गभूतं भवितुमर्हति।

अङ्गिनः धर्मः अङ्गे भवति, किन्त्वस्य धर्मस्य सत्ता तदैव स्वीकृता स्याद्यदा अङ्गः अङ्गिना निबद्धः स्यात्।

अनिबद्धपदवृन्दं तथा चानियताक्षरम्।
अर्थापेक्षाक्षरयुतं ज्ञेयं चूर्णपदं बुधैः॥
निबद्धाक्षरसंयुक्तं पदच्छेदसमन्वितम्।
निबद्धं तु पदं ज्ञेयं प्रमाणनियताक्षरम्॥
छन्दोहीनो न शब्दोऽस्ति नच्छन्दः शब्दवर्जितः।
तस्मात्तूभयसंयुक्ते नाट्यस्योद्योतके स्मृतम्॥
(नाट्यशास्त्रम् १४।३५, ३६ एवम् ४०)

छन्दसि चत्वारः पादाः चरणा वा सन्ति। पादरहिता पदावल्येव गद्याख्या भवति। गद्यलिखितायां कस्यांश्चित्पदावल्यां वृत्तगन्धिता भवितुमर्हति, किन्तु तत्र पद्यांशत्वं न स्वीकर्तुं शक्यं, यतो हि पद्यपूर्णता पादचतुष्टयत्वेन निर्णीयते।

पद्यं काव्यस्य बन्धस्य चाधारेण द्विविधं स्वीकृतं - प्रबन्धं मुक्तकञ्चेति। यस्मिन् काव्ये किमपि कथावस्तु सत् तस्य धारातः अन्तं यावत् अविच्छिन्नरूपेण चलति, तत् काव्यं प्रबन्धमुच्यते। इत्थं काव्यस्य प्रत्येकस्मिन् सर्गे प्रत्येकमनुच्छेदः छन्दो वा तं कथाप्रबन्धमाश्रित्य वर्तते। प्रबन्धात् भिन्नमस्य अस्तित्वं चमत्कारपूर्णं नास्ति। अस्य यथावत् विपरीतं मुक्तकाव्यमुच्यते, यस्मिन् प्रत्येकमपि पदं पद्यसमूहस्वतन्त्रं भवति, तथा स्वपूर्वापरप्रसङ्गादपि मुक्तं भवति। मुक्तकस्य एक एव श्लोकः चमत्कारमुत्पादयितुं सक्षमो भवति। अतः मुक्तकं स्वयमेव पूर्णं तिष्ठति।

प्रबन्धकाव्ये कविः विस्तृतं क्षेत्रं प्राप्नोति, परं मुक्तके तस्य क्षेत्रम् अत्यन्तं सङ्कुचितं भवति। पद्येनैकेन समस्तानां भावानां समावेशीकरणं, रसानां पूर्णपरिपाकदर्शनं, प्रबन्धकाव्यस्य समस्तरससामग्र्याः एकस्मिन् छन्दसि निबन्धनमिति सर्वमेतत्तु घटे गजनिवेशनमिव भवति। अतः मुक्तककाव्यरचने प्रबन्धकाव्यरचनापेक्षया न्यूनाया कौशलताया अपेक्षा नास्ति। मुक्तके प्रबन्धसमानरसस्य धारा न भवति। तत्र तु कथाप्रसङ्गपरिस्थितौ पाठकः आत्मानं विस्मृत्य काव्ये मग्नो भवति तथा सः हृदये स्थायीप्रभावं गृह्णाति। रसप्रभावेणानेन हृदयपुष्पं ईषत्कालं यावत् विकसितं भवति। यदि प्रबन्धकाव्यं किञ्चित् विस्तृतं वनस्थलं मन्येत, तर्हि मुक्तककाव्यं चितमेकं पुष्पगुच्छो भवति। अत्र रमणीयखण्डदृश्यम् इत्थं सहसा अग्रे आनीयते यथा पाठकः श्रोता वा द्वित्रान् क्षणान् यावत् मन्त्रमुग्धत्वमाप्नुयात्। एतदर्थं कवेः मनोहरवस्तूनां व्यापाराणां च कञ्चित् स्तबकं कल्पयित्वा, ततः तमत्यन्तं सङक्षिप्तं कृत्वा सशक्तभाषायां तस्य प्रदर्शनं करणीयं भवति। अतः कवौ कल्पनायाः समाहारशक्त्या सह भाषायः समासशक्तिरपि यावती अधिका स्यात्, तावत्येव मुक्तरचना सफलतायै कल्पते।

प्रबन्धकाव्येऽपि भेदद्वयं भवति - तद्यथा महाकाव्यं खण्डकाव्यमिति। महाकाव्ये जीवनस्य जगतश्च व्यापकं वर्णनं करणीयं भवति, परं खण्डककाव्ये तु घटनाविशेषस्यैव वर्णनं कर्तव्यं भवति। वस्तुविस्तारः, बहुविधवर्णनं, नायकमहत्ता, चित्रणं, रसपरिपकाः इत्येतेषां दृष्ट्या महाकाव्ये पर्याप्तानि क्षेत्राणि सन्ति, किन्तु खण्डकाव्ये सीमितान्येव तानि। महाकाव्ये कथावस्तु कविकल्पनाप्रसूतं सत् प्राचीनाख्यानम्, ऐतिहासिकवृत्तिं वाऽऽश्रितं भवेत्। नायकः सुवंशजः धीरोदात्तप्रकृतिकश्च स्यात्। तत्र नगरः समुद्रः पर्वतः ऋतुः सूर्योदयः जलक्रीडा उपवनविहारः विवाहः यात्रा, युद्धं विजयप्राप्तिः इत्यादीनां वर्णनं यत्र तत्र भवेत्। प्रतिनायकगुणाः अपि उदात्ताः स्युः। महाकाव्ये श्रृङ्गारवीर्ययोः अन्यतमो रसो मख्यो भवति। अन्ये रसाः गौणरूपेण प्रयुक्ताः सन्ति। सम्पूर्णं काव्यं सर्गशः विभक्तं भवति। सर्गसङ्ख्या अष्टाभ्यः न्यूना न भवेत्। एकस्मिन् सर्गे एकस्यैवच्छन्दःप्रकारस्य प्रयोगः स्यात्, सर्गान्ते च तत्परिवर्तनं भवेत्। महाकाव्यस्या प्रारम्भे मङ्गलाचरणं, सज्जनस्तुतिः, खलनिन्दा इत्यादयः स्युः। महाकाव्यस्यैतानि उपरोक्तानि लक्षणानि नैकेषु लक्षणग्रन्थेषु दृश्यन्ते। खण्डकाव्ये सर्गसङ्ख्या महाकाव्यात् न्यूना भवति, तथा तस्मिन् वर्णनमपि अविस्तारं भवति।

राजशेखरेण प्रबन्धकाव्यं शुद्धं चित्रं कथोत्थं संविधानकभवम् आख्यानवच्चोक्तम्। पद्येषु इतिवृत्तात्मकसङ्केतस्य भावाभावत्वभेदेन इदं वर्गीकरणं कृतम्। प्रबन्धकाव्याश्रिते कस्मिंश्चिदपि पद्ये यदि एतानि लक्षणानि लभ्यन्ते, तर्हि तस्य पद्यस्य नामकरणम् एतेषां भेदानामाधारेण कर्तुं शक्यम्।

श्रव्यकाव्यस्य वर्ण्यविषयाधारेण भोजेन षड्भेदाः उक्ताः - काव्यं शास्त्रम् इतिहासः काव्यशास्त्रं काव्येतिहासः शास्त्रेतिहासश्चेति। काव्यं शासात्रम् इतिहासः इति त्रयमेतत् पद्यशैल्यां वर्णयितुं शक्यम्। अस्य मिश्रितरूपवर्णनमपि साध्यम् -

काव्यं शास्त्रेतिहासौ च काव्यशास्त्रं तथैव च।
काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्॥
(स.कण्ठा.२।१६७)

खण्डकाव्यं शैलीदृष्ट्या महाकाव्यसदृशं भवति। तत्र एका घटना, एकः रसः, एकश्च भावः मुख्यो भवति। एतत् सर्गाष्टकात् ह्रस्वं भवति। क्वचित्क्वचित्तु गीतिकाव्यरूपेणाप्यस्य प्रस्तुतिः साध्या भवति। अन्येषां रसानां वर्णनानां चावकाशः तस्मिन् न्यूनो भवति। महाकाव्यस्य बहुविधप्रभावः, खण्डकाव्यस्य चैकविधप्रभावः भवति।

मुक्तककाव्यस्यापि अनेकभेदोपभेताः प्रदर्शिताः। छन्दस्सङ्ख्याऽऽधारेण अस्य निम्नलिखिता भेदा उक्ताः-

१) मुक्तम् - पूर्वापरप्रसङ्गमुक्तम् एकच्छन्दसा भावपूर्णतासम्पन्नं चमत्कारोत्पादकं यत् काव्यं तन्मुक्तकमुच्यते।
२) सन्दानितरम् - यत्र पद्यद्वयेन (छन्दोद्वयेन) भावपूर्णताप्राप्तिर्भवति, तत् सन्दानितकमुच्यते। हेमचन्द्रेन एतत् सन्दानितकमुक्तं, तथा विश्वनाथेन पद्यद्वयमेलनस्य युग्मकं, पद्यत्रयलमूहस्य च सन्दानितकमिति नाम दत्तम्।
३) विशेषकम् - पद्यत्रयसमूहं काव्यमेतत्।
४) कलापकम् - पद्यचतुष्टयसमूहं काव्यमेतत्।
५) कुलकम् - आपञ्चात् चतुर्दशपद्यानि यावत् यस्मिन् काव्ये भवति तस्य कुलकमिति नाम हेमचन्द्रेण विश्वनाथेन च स्थापितम्।

वाग्भटेन तु युग्मुकं सन्दानितकात् अभिन्नमुक्तम्, परं कुलकपद्यानां सङ्ख्या पञ्चात् आरभ्य द्वादशं यावत् भवितुमर्हतीति वाग्भटमतम्। उक्तं हि –

“तत्रैकेन छन्दसा मुक्तकं, द्वाभ्यां युग्मं सन्दानितकं च, त्रिभिर्विशेषकं, चतुर्भिः कलापकं, द्वादशान्तैः कुलकम्।”
(काव्यानुशासनम् प्र.अ.)

यदा भावपूर्णता अनेकपद्येषु भवति, एका एव क्रियया च सह यत्र सर्वाणि पदानि अन्वितानि स्युः, तर्हि अयं भेदः चरितार्थो भवति। मुक्तककाव्यमनिबद्धं भवति। हेमचन्द्रेण प्रबन्धमुक्तकसंज्ञायाः स्थाने निबद्धम् अनिबद्धमिति च नामनी दत्ते। अनिबद्धकाव्येषु पञ्चप्रकाराणां मुक्तककाव्यानां गणना कृता भवति।

मुक्तकपद्यानां सङ्ग्रहग्रन्थानामपि कोशः, सङ्घातः संहिता इत्यादीनि नामानि दत्तानि। -

“स्वपरकृतमसूक्तिसमुच्चयः कोशः। यथा, सप्तशतकादिः। एकप्रघट्टके एककविकृतः सूक्तिसमुदायो वृन्दावनमेघदूतादिः सङ्घातः। विप्रकीर्णवृत्तान्तानाम् एकत्र सन्धानं यदुवंशदिलीपवंशादिवत् संहिता, एवमनन्तो निबद्धगणः॥”
(काव्यानुशासनम् ८।१३, १४, १५, पृ. ४०८)

विश्वनाथेन परस्परानपेक्षी श्लोकसमूह एव कोशः उक्तः, यश्च व्रज्याक्रमेण रचितो भवति। सङ्घातस्योदाहरणं मेघदूतो न भवितुमर्हति, यतो हि तत्र पद्यानि एककविकृतानि सन्ति चेदपि परस्परम् अनिबद्धानि न सन्ति। अतः विश्वनाथेन मेघदूतं निबद्धकाव्यस्यान्यतमभेदस्य खण्डकाव्याख्यस्य उदहरणमुक्तम्। इतस्ततः क्षिप्तानां वृत्तान्तानां श्लोका अपि परस्परानपेक्षा न वर्तन्ते। कस्यचिदप्युपाख्यानस्य अपरेण केनचिदुपाख्यानेन सह सम्बन्धो न भवति, परन्तु समानोपाख्यानाश्रितानि पदानि परस्परं सापेक्षाणि भवन्ति। अतः विशुद्धमुक्तसङ्ग्रहः कोशः सङ्घातश्च भवति, संहिता न। सर्वे एते भेदाः पद्यकुटुम्बसदस्याः भवन्ति-

"महाकाव्यं कलापश्च पर्याबन्धो विशेषकम्।
कुलकं मुक्तं कोष इति पद्यकुटुम्बकम्॥" (अ.रु. ३३७।२४)
मुक्तकं कुलकं कोशः सङ्घात इति तादृशः।
सर्गबन्धांशरूपत्वादनुक्तः पद्यविस्तरः॥ (काव्यादर्शः १।१३)

राजशेखरेण काव्यमीमांसायां नवाध्यायेषु पद्यानां विशिष्टताऽऽधारेण काव्यानां वर्गीकरणं कृतम्। -

"स पुनर्द्विधा मुक्तकप्रबन्धविषयत्वेन। तावपि प्रत्येकं पञ्चधा। शुद्धः चित्रः कथोत्थः संविधानकभूः आख्यानकवांश्च। तत्र मुक्तोतिवृत्तः शुद्धः। स एव सप्रपञ्चश्चित्रः। वृत्तोतिवृत्तः कथोत्थः। संभावितेतिवृत्तः संविधानकभूः। परिकल्पितेतिवृत्तः आख्यानकवान्॥"

अस्य वर्गीकरणस्य मुख्यः आधारः श्लोके प्रयुक्तः इतिवृत्तात्मकसङ्केतो भवति। इतिवृत्तात् मुक्तं यच्छन्दः तच्छुद्धमुच्यते। इतिवृत्तान्मुक्तं किन्तु प्रपञ्चयुक्तं काव्यं चित्रमित्युच्यते। इतिवृत्तसङ्केते सति, कथोत्थेन वर्णनेन च संभावितेतिवृत्तस्याभासे च सति संविधानकभूः उच्यते। यदि पद्ये कश्चित् काल्पनिकस्य इतिवृत्तस्य समावेशः स्यात्तर्हि तदाख्यानकवानुच्यते। अयं काल्पनिकः इतिवृत्तः इतिहासेन कल्पनया च मिश्रितो भवितुमर्हति, विशुद्धः कल्पितो वापि।
मुक्तककाव्यस्य सर्वाण्येतानि रूपाणि सर्गबद्धस्य प्रबन्धकाव्यस्य अंशरूपेण प्रयुक्तानि भवितुमर्हन्ति। इतस्ततः क्षिप्ते रत्नसमूहे प्रत्येकमपि रत्नः स्वस्य स्वस्य स्वतन्त्राायाः दीप्त्याः चमत्कारं पृथक् पृथक् दर्शयति, किन्तु मालायामेकायां तेषां रत्नानां संयोगात् न तत्र सौन्दर्यन्यूनता भवति। अपि तु तेषां समन्वितसौन्दर्यस्य तत्र अपूर्वं रूपं दृश्यते प्रेक्षकैः। तथैव प्रकारप्रसङ्अगात् मुक्तं, किन्तु स्वतन्त्रचमत्कारपूर्णभावोत्पन्नं यदा किञ्चित् मुक्तकं तस्यैव भावस्य अभिव्यक्त्यर्थं किमपि प्रबन्धं काव्यमाश्रयते, तदा तस्य चमत्कारे काव्यगतसौन्दर्ये च न्यूनता न भवति।

## संदर्भ सूची


1. साहित्यदर्पणम् विश्वनाथ-कविराजः डा. लोकमणि दाहल चौखम्बा सुरभारती प्रखाशन्, वाराणसि 2008
2. काव्यप्रकाशः आचार्यमम्मटः श्री हरिशंकर शर्मा चौखम्भा प्रकाशन, वाराणसी, 2010
3. काव्यप्रकाशः आचार्यमम्मटः डा. सत्यव्रत संह चौखम्बा विद्याभवन, वाराणसि 2007
4. नाट्यशास्त्रम् भरतमुनिः श्री बाबूलाल शुक्ल चौखम्बा संस्कृत संस्थान, वाराणसी, 2009
5. संस्कृतसाहित्ये- तिहासः डा. लोकमणि दाहल चौखम्बा कृष्णदास अकादमी, वाराणसि
6. संस्कृतसाहित्ये-तिहासः Prof. R S Venkatarama Sastri KSRI, Chennai 1996
7. संस्कृत काव्यशास्त्र का इतिहासः उदयनाथ झा, अशोक न्यू भारतीय बुक कार्पोरेशन, दिल्ली, 2012